स्त्रिधर्मणस्त्वासीत् विद्वांस्त्रय्यारुणः सुतः” हरिवं०१२अ०।

**त्रस** गतौ ग्रहे निषेधे च चुरा० उभ० सक० सेट्। त्रसयति ते अतित्रसत् त।

**त्रस** भासे वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट् इदित्। त्रंसयति ते त्रंसति अतत्रंसत् त अत्रंसीत्।

**त्रस** भये वा दिवा० पक्षे भ्वा०पर०अक०सेट्। त्रसति अत्रासीत् अत्रसीत् तत्रास फणा० त्रेसतुः तत्रसतुः। ईदित् त्रस्तः। तस्य दिवादित्वे सार्वधातुके श्यन्। त्रस्यति। “त्रस्यन्ती चलशफरीविघट्टितोरुः” माघः “त्रस्तु राहितस्तासंभ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रिसाम्” “मुक्तरत्नसङ्गिरपि यत्र गौरवात्” माघः। “त्रस्यन् वै जायमानेभ्यः” भट्टिः। “ततो रामेति चक्रन्दुस्त्रेसुः परिदिदेविरे” भट्टिः “कपेरत्रासिषुर्नादात् मृगाः सिंहध्वनेरिव” भट्टिः। “राक्षसस्य न चात्रासीत् प्रनष्टुमयतिष्ट च” भट्टिः।

उत्+उत्कटत्रासे। “बालानुत्त्रासयन्ति ह” हरिवं०२२७७।

**त्रस** त्रि० त्रस–भये आधारे घञर्थे क।१वने त्रिका०। त्रसगतौ अच्। २जङ्गमे त्रि० अमरः। त्रसरेणुः।

**त्रसदस्यु** पु० मान्धातृपौत्रभेदे। “तस्यामुत्पादयामास मान्धाता द्वौ सुतौ नृप!। पुरुकुत्समथ धर्मज्ञं मुचुकुन्दञ्च धार्मिकम्। पुरुकुत्ससुतस्त्वासीत् त्रसदस्युर्महीपतिः” हरिवं० १२ अ०। [३त्रासयुक्ते त्रि०।

**त्रसन** न० त्रस–भावे ल्युट्। १भये २उद्वेगे कर्त्तरि ल्यु।

**त्रसर** पु०त्रस–अरन्। तन्तुवायोपकरणभेदे (तासनी) अमरः

**त्रसरेणु** पु० त्रसः चलो रेणुः कर्म०। “जालान्तरगते भानौ सूक्ष्मं यद्दृश्यते रजः। प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते” मनूक्ते गवाक्षान्तर्गतसूर्य्यकिरणेषु १दोधूयमाने रजसि २परमाणुषट्कात्मके द्व्यणुकत्रयात्मके रजसि “परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः” ब्रह्मवै०। “जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते। त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणुभिः” इति वैद्यकपरिभाषया ३त्रिंशत्परमाणुरूपे रजसि च। ४सूर्य्यपत्नीभेदे स्त्री त्रिका०।

**त्रसुर** त्रि० त्रस–उरच्। भीरौ संक्षिप्तसारः।

**त्रस्त** त्रि० त्रस–क्त। १भीते २चकिते। ३शीघ्रे न०। “त्रस्तौ समासन्नकरेणुसूत्कात्” “त्रस्तः समस्तजनहासकरः करेणुः” माघः “जुगोपात्मानमत्रस्तः” रघुः।

**त्रसु** त्रि० त्रस–क्नु। भीरौ त्रासशीले अमरः। “सीतां सौमित्रिणा त्यक्तां स भीरुं त्रस्नुमेकिकाम्” भट्टिः “अत्र त्रस्नुभिर्युक्तधुरं तुरङ्गैः” रघुवंशकाव्यम्।

**त्रा** पालने अदा० आ० सक० अनिट् क्रमदीश्वरः। त्राते अत्रात। “कान्तारे ब्राह्मणान् गाश्च यः परित्राति कौशिक!” भा०अनु०७३अ०। आर्षत्वात् पदव्यत्ययः।

**त्राण** न०त्रै–पालने भावे ल्युट् भावे क्त तस्य नो वा।१रक्षणे। कर्मणि क्त वा तस्य नः।२रक्षिते त्रि० ३त्रायमाणालतायां न० मेदि० तत्रार्थे स्त्री राजनि०। “न कुर्यादात्मनस्त्राणं गोरकृत्वा तु शक्तितः” मनुः। [भावे क्त। २रक्षणे न०।

**त्रात** त्रि० त्रै–कर्मणि क्त वा तस्य नत्वाभावः। १रक्षिते

**त्रापुष** त्रि०त्रपुणा निर्वृत्तम् अण् षुक् च। रङ्गमये पात्रादौ।

**त्रामन्** त्रि०त्रै–पालने मनिन्।१रक्षके “तव त्रामभिरिन्द्र! तूर्वयानम्” ऋ० १।५३।१०।

**त्रायन्ती** स्त्री त्रै–सम्प० भावे क्विप् त्राः तामयति गच्छति भ्वा० इ गतौ शतृ–ङीप्। त्रायमाणालतायाम् अमरः। “त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा। ज्वरहृद्रोगगुल्मास्रभ्रमशूलविषप्रणुत्” भावप्र०। “कलसी बृहती द्राक्षा त्रायन्ती निम्बगोक्षुरीः” सुश्रु०। स्वार्थे क। त्रायन्तिका तत्रार्थे “प्रियङ्ग्वनन्तायूथिकापद्मात्रायन्तिकालोहितिकाम्बष्ठादाडिमत्वक्शालपर्णीपिप्पलुकुकुरधातकीवकुलशाल्मलीश्रीवेष्टकमोचरसेष्वरिष्टानवकृतीर्लेहानासवान् कुर्वीत” सुश्रु०।

**त्रायमाण** त्रि० त्रायते त्रै–कर्मणि शानच्। १रक्ष्यमाणायां (बाला)ख्यातायां २लतायाम् अमरः। स्वार्थे क। तत्रार्थे स्त्री राजनि०। [ दशीभवे।

**त्रायोदश** त्रि० त्रयोदश्यां भवं सन्धिवेला० अण्। त्रयो-

**त्रास** पु०त्रस–भावे घञ्। १भये “त्रासाकुलः परिपतन् परितो निकेतान्” माघ०।२मणिदोषभेदे च मेदि०।

**त्रासन** न०त्रस–णिच् भावे ल्युट्। १भयोत्पादने कर्त्तरि ल्यु। २भयोत्पादके त्रि०।

**त्रि** त्रि० ब० व० तॄ–ड्रि। त्रित्वसंख्याविशिष्टे। “इति वेदास्त्रयस्त्रयी” अमरः “न्यायैस्त्रिभिरुदीरणम्” कुमा० “त्रिभ्य एव तु वेदेभ्यः पादत्रयमदूदुहत्” मनुः। स्त्रियां गौणे मुख्ये च विभक्तौ परतः तिस्रादेशः। तिस्रः अतितिस्रा। कैश्चित्तु प्रियतिसेत्युदाहृतम् तच्चिन्त्यम् “तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्” कुमा०। त्रयाणां वेदे तु क्वचित् त्रीणाभिति रूपं “महि! त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः” ऋ०१०।१८५।१।

**त्रिंश** त्रि० त्रिंशत्+पूरणे डट्। त्रिंशत्पूरणे, त्रिंशत्तमे